**Sri Sathya Sai Books and Publications Trust,**
**Prasanthi Nilayam.**

# श्री रुद्रम्

## 11th Anuvaka

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

sahasrāṇi sahasraśo ye rudrā adhi bhūmyām।

तेषागं् सहस्रयोजनेऽवधन्वानि तन्मसि ।

teṣāgṁ sahasrayojane'vadhanvāni tanmasi।

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।

asminmahatyarṇave'ntarikṣe bhavā adhi।

नीलग्रीवाः शितिकण्ठाः शर्वा अधः, क्षमाचराः ।

nīlagrīvāḥ śitikaṇṭhāḥ śarvā adhaḥ , kṣamācarāḥ।

नीलग्रीवाः शितिकण्ठा दिवगं् रुद्रा उपश्रिताः ।

nīlagrīvāḥ śitikaṇṭhā divagṁ rudrā upaśritāḥ।

ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः ।

ye vṛkṣeṣu saspiñjarā nīlagrīvā vilohitāḥ।

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।

ye bhūtānāmadhipatayo viśikhāsaḥ kapardinaḥ।

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

ye anneṣu vividhyanti pātreṣu pibato janān।

ये पथां पथिरक्षय ऐलबृदा यव्युधः ।

ye pathāṁ pathirakṣaya ailabṛdā yavyudhaḥ|

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥

ye tīrthāni pracaranti sṛkāvanto niṣaṅgiṇaḥ||

य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे ।

ya etāvantaśca bhūyāgṁsaśca diśo rudrā vitasthire|

तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥

teṣāgṁ sahasrayojane'vadhanvāni tanmasi||

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥११॥

namo rudrebhyo ye pṛthivyāṁ ye'ntarikṣe ye divi yeṣāmannaṁ vāto varṣamiṣavastebhyo daśa prācīrdaśa dakṣiṇā daśa pratīcīrdaśodīcīrdaśordhvāstebhyo namaste no mṛḍayantu te yaṁ dviṣmo yaśca no dveṣṭi taṁ vo jambhe dadhāmi **||11||**

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ||

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

tryambakaṁ yajāmahe sugandhiṁ puṣṭivardhanam|

उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् ॥

urvārukamiva bandhanānmṛtyormukṣīya mā'mṛtāt||

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु ॥

yo rudro agnau yo apsu ya oṣadhīṣu yo rudro viśvā bhuvanā viveśa tasmai rudrāya namo astu||

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।

ye te sahasramayutaṁ pāśā mṛtyo martyāya hantave|

तान् यज्ञस्य मायया सर्वानव यजामहे ।

tān yajñasya māyayā sarvānava yajāmahe|

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥

mṛtyave svāhā mṛtyave svāhā||

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।

prāṇānāṁ granthirasi rudro mā viśāntakaḥ|

तेनान्नेनाप्यायस्व । नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

tenānnenāpyāyasva| namo rudrāya viṣṇave mṛtyurme pāhi||

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।

tamu ṣṭuhi yaḥ sviṣuḥ sudhanvā yo viśvasya kṣayati bheṣajasya|

यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥

yakṣvāmahe saumanasāya rudraṁ namobhirdevamasuraṁ duvasya||

अयं मे हस्तो भगवानयं मे भगवत्तरः ।

ayaṁ me hasto bhagavānayaṁ me bhagavattaraḥ|

अयं मे विश्वभेषजोऽयगं् शिवाभिमर्शनः ॥

ayaṁ me viśvabheṣajo'yagm śivābhimarśanaḥ ||

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ||